वाल्मीकि महाविद्यालय पोखरा पुस्तकालय

१२०६

श्री शारदायै नमः

कृतमय-नेपाल-देशः

सा
६२४

लेखकः

पं० सोमनाथ शर्मा घिमिरे 'व्यासः'

प्रकाशकः

श्री राजा तारक बहादुर शाह
सम्माननीय सदस्य
राजसभा स्थायी समिति
काली माटी, काष्ठमण्डप, नेपाल

ीय-विश्वहिन्दू-सम्मेलनम्, प्रयागः

त् २०३५ माघ १४ गते २८-१-७९

॥ श्री शारदायै नमः ॥

संस्कृतमय-देश-नेपालः

सं. ६२४

लेखकः—
पं० सोमनाथ शर्मा घिमिरे 'व्यासः'

८५८२

प्रकाशकः—
श्री राजा तारक बहादुर शाह
संमाननीय सदस्य
राजसभा स्थायी समिति
केशरी सदन, काली माटी, काठमाडौं, नेपाल

सम्वत् २०३५ श्रीपञ्चमी] [मूल्यम् सपादरुप्यकम्

● प्रकाशकः--राजा तारक बहादुर शाह

● ग्रन्थनाम--संस्कृतमय-नेपाल-देशः

● लेखकः--पं० सोमनाथ उपाध्याय घिमिरे 'व्यासः'

● सर्वाधिकारः--लेखकाधीनः

● मितिः--२०३५ श्रीपञ्चमी

● मूल्यम् --सपादरुप्यकम् ४/—

प्राप्यस्थानम्—:

१—व्यास प्रेस
टंगाल, काष्ठमण्डप
नेपाल

२—वार्ड नं० १ घिमिरे घर
जनकपुर धाम

३—खेमराज श्रीकृष्णदास पुस्तकालय
चौक, वाराणसी

श्री ५ महाराजाधिराजवीरेन्द्रवीर विक्रम शाहदेव

हिन्दूदेशोत्तमाङ्गस्य नेपालस्य प्रजापतिः ।
राज्यसिंहासनारूढो हिन्दूसम्राट्पदस्थितः ॥१॥
श्रीमान् मान्योवदान्यश्च वीरेन्द्रो वीरविक्रमः ।
शाहदेव विरुद्युक्तो नेपालीयान् जनान्मुहुः ॥२॥
पञ्चायतस्यसिद्धान्तं बोधयन् राज्ञतेऽधुना ।
यत्प्रभावसमुद्भूतो विकासः परिवर्धते ॥३॥



सा
६२५

श्री राजा तारक बहादुर शाह सम्माननीय सदस्य
राजसभा स्थायी समिति

प्रकाशकं प्रति

हिमशैलनदीपूर्णे प्राकृतोद्यानसन्निभे ।
हिन्दूधर्मसुधाऽऽधारे नेपाले शस्यश्यामले ॥१॥

राजमानोऽधुना 'राजातारकाख्यबहादुरः'
शाहवंशाऽवतंसोऽयं समाजस्य सुसेवकः ॥२॥

नरेशदेशयोर्भक्तः शिक्षाप्रेमी दृढव्रती ।
स्वस्थं चिरायुषञ्चैनं कुर्यात्पशुपतिः सदा ॥३॥



श्री पं० सोमनाथ शर्मा घिमिरे "व्यासः"



प्रकाशकीय-वक्तव्य

पं० श्री सोमनाथ घिमिरे 'व्यास' नेपालका ख्याति प्राप्त विद्वान् हुनुहुन्छ। उहाँले द्वितीय-विश्वहिन्दू-सम्मेलन प्रयागमा प्रवचन गन तयार गर्नुभएको लेख कतिपय कारणले सम्मेलनमा व्यक्त गर्न सक्नुभएन। सो लेख अर्थसहित मलाई सुनाउनु हुँदा ज्यादै शिक्षाप्रद, ऐतिहासिक, धार्मिक, सांस्कृतिक ठहरिएकाले छापी प्रकाशन गर्न उचित सम्झी प्रकाशमा लाइएको छ। संस्कृतज्ञ महानुभाव-हरूले आद्योपान्त पढ़ी, सम्झी सम्झाइदिनुभए उभय कल्याण हुने छ।

प्रार्थी—

श्री राजा तारक बहादुर शाह

सम्माननीय सदस्य

राजसभा स्थायी समिति

केशरी सदन, काली माटी

काठमाडौं, नेपाल

धर्मदृढबद्धमूलो वेदस्कन्द, पुराण-शाखाढ्य
क्रतुकुसुमो मोक्षफलो मधुसूदन-पादपो जयति

लेखकस्योद्गारः

या भूमिर्वेदशास्त्रोन्मुखनृपतिवरैः शास्यते न्यायपूर्वम् ।
प्रालेयाच्छन्नशैला द्विजपति धवला भान्ति यस्या समन्तात् ।
हिन्दूराष्ट्रेऽतिरम्येऽखिलभुवनमनोमोदकेन्द्रायमाने
नेपालेविद्यतेऽसौ द्विजवरधिमिरे पण्डितः सोमनाथः ॥ १ ॥

वाणाऽन्याकाशनेत्राऽङ्कितसमयनितेवैक्रमाब्देप्रयागे
हिन्दूसम्मेलनाख्येवुधगणरमणीयेप्रसिद्धे द्वितीये ।
वर्णानामाश्रमाणां गतिविधि कथनार्थं जनानां समक्षे
तेनैवाऽयंनिबद्धः श्रुतिभणितसमृद्धो नवीनो निबन्धः ॥ २ ॥

वेदबाह्य बुधारब्धे हिन्दूसंमेलनोत्सवे ।
विहाय श्रावणं तूर्णं प्रयागात् प्रस्थितोद्रुतम् ॥ ३ ॥

विश्वनाथपुरीं प्राप्य हृदयोद्घाटितेतदा
विद्वत्सम्मतिमादायमुद्रापयति सम्प्रति ॥ ४ ॥

शराऽन्यम्बर नेत्राणां मिते वैक्रम वत्सरे
माघेवसन्तपञ्चम्यां गुरौ काश्यां प्रकाश्यते ॥ ५ ॥

इयं भारतभूमिः ज्ञाननिष्ठानां ब्राह्मणानां वीरवरेण्यानां, राजन्यानां, दानवीराणां, वैश्यवराणां, भक्ताग्रणिनां, धार्मिकधौरेयाणाञ्च जन्मदानेन विश्वविश्रुतास्ति, इति विश्वसिमि।

अयि प्रिततमाः प्राज्ञाः, प्रेयांसश्छात्राः, मान्या मनीषिणश्च यामिमां हिन्दुसंस्कृतेर्भूषणां गीर्वाणवाणीं केचित् विफलां, केचिद्जीर्णां, केचिच्चमृताम् इति प्रलपन्तिः। नेयं तथा परन्तु एषा कामानां दोग्ध्री, त्रिविधस्यापि तापानां निहन्त्री, आत्मज्ञानस्य प्रसवित्री, धर्म्ये पथि विहर्तां वर्णाश्रमाचारमधुरं-राज्यधूरमावहतां भवसंगं जिहासतां प्रत्यगीक्षणे रिरंसतां, नवनवरसैर्मनोविनोदमभिलषतां, साहित्यसंगीतकलाकोविदनानाविधशिल्पविद्यानां, सर्वेषामेवानन्यसाधारणमुपकरणमिति नात्रतिरोहितं किमपीति विवेकवताम्, एवं सत्यपि समस्ताभिलषितफलदानसमर्था सैषा सुरभारती सम्प्रति न तादृशाय फलाय कल्पते इत्यपि स्वयं प्रकाशोऽयं विषयो न पिधानमर्हति। स कस्य दोषः ? अपि तस्याः ? उत कालस्य प्रतिपलं परिवर्तनशीलस्य ? आहोस्विद् अस्माकं भागधेयदुष्परिपाकस्य ? अथवा राजनीतिकपराजयस्य ? इत्यवश्यं विचारणीयम्, मम तु इत्थं प्रतिभाति अत्र अस्माकमेव कुलिशशतैरपि अभेद्यम् आलस्यम् कालेन च तज्जनितम् असामर्थ्यम् एव च वलबन्निदानम् इति। इदमपि सर्वानुभववेद्यम् यद् अतिमधुरस्य अनल्पीयसः पयसो दोग्ध्री अपि धेनुः स्याद् यदि दोग्धा यथावत् सम्यग् न समुपसीदति ताम् न वा तदनुरूपं चेष्टितुं जानाति न च तां घासयवसपिष्टपिण्याकादिभिः पोषयति तदा दुग्धपूरपूरिता पीना एव अवतिष्ठेत, कालेन परिशुष्यत् यया अपि सा जायेत नतु स्वानुरूपं दुग्धं प्रयच्छति इति। तथैव इयं गीर्वाणी अपि वाणी सर्वकामदुधाऽस्ति, तथापि आलस्यादिभिः परिभूतशक्तिभि अस्माभिः, अदुह्यमाना एव सती अप्रकटिताऽमृतरसा एव तिष्ठति

न चापि स्वसमुचितं फलं प्रदातुं प्रभवति, तमिमं महान्तम् आत्मगत दोषंदोहनाऽसामर्थ्यादिरूपं परत्र गीर्वाणवाण्यां भ्रमवशाद् राजनयिव स्वार्थवशात् अन्यस्माद् वा कारणवशाद् अध्यस्यन्ति यथा मरुमरी चिकायां तोयमध्यस्यन्ति पशवः सा हि गीर्वाणवाणी अभिलषित-पूरणी त्यत्र न मात्रयापि संशयितव्यम्। अतएव कविसाम्राज्यधुरन्धरेण भवभूतिमहोदयेन उक्तम् -"कामं दुग्धे विप्रकर्षत्यलक्ष्मीं, कीर्तिं सूते दुर्हृदोनिष्प्रलाति, शुद्धां शान्तां मातरं मङ्गलानां, धेनुं धीराः सूनृता वाचमाहुः।" उत्तर चरित ४-३० तथापीदं कटुसत्यं यदुत वयं पूति कुष्माण्डन्यायपदवीमारोपिताः सर्वतः समुदायात् लोकयात्रानिर्वहण निपुणात् न केवलं परिचयामहे किन्तु सति अवसरे निःसंकोचम् उपहास-विषयताम् अपि आपाद्यामहे। अस्मासु केचन अन्तः सन्तुष्यन्तु नाम आत्मनः अनितरसाधारणीयधिषणा धिषणधिषणाया अपि दुरवगाह-न्यायजालनिरन्तर-परिशीलनपरिप्राप्ताम् विविधवाद कुतूह लितां सुचिरां विभाव्य विभाव्य हृष्यन्तु नाम स्वीयां मीमांसा-न्याय साहस्रीविचार-चातुरीम् इतरजनदुर्लभां स्मारं स्मारं माद्यन्तु वा विवि धवेदान्तवादावलीनिरन्तरनिध्याननिष्पादितां प्रतिवादिवित्रासन पटुताम् आत्मीयाम् सञ्चिन्त्यानुचिन्त्य च न वयं तन्निवारयामः अनुमोदामहे एव परमेण भावेन सा हि अस्माकं पुरातनीपरिपाटी भूषणमेव। परमेतावता पूर्वोक्तदोषापाकरणे किमायातं ? किमेतावता सन्तुष्टिं विधाय अवस्थानम् आधुनिके कालप्रवाहे विदुषामुदरभरणाय अलम् ? अथवा सभ्यता संपादने वा ? यदिदमुच्यते आस्माकीनेयं गीर्वाणवाणी तदवलम्बिन्यो वासर्वा अपि विद्या नोदरभरणाय अभ्यस्यन्ते न हि चुलुकपरिमितजलाप्तये वाप्यः पुष्करिण्यो वा खन्यन्ते अनया च

सुरभारत्या अतिमहन् निरतिशयं स्वर्गमपवर्गमात्मज्ञानादिकं वा फलं समर्पयदन् अस्मत्पूर्वजाः। अस्माभिरपि तथैव यतितव्यम् नतु अतिक्षुद्रे उदरपूरणादौ ऐहिकफले इति सत्यमेतत् नात्रसंशयलेशः परन्तु अनेन सुरभारतीसमुपासकेन लोकयात्रापि निर्बहणीया किमन्यत्साधनं स्वकुटुम्बभरणाय स्वोदरपूरणाय वा अन्विच्छेदयं वराकस्तपस्वी ? नहि बुभुक्षितः स्वर्गं वाञ्छत्यपवर्गं वात्मज्ञानं वा। अतोहेतोर्यद्यस्माभिरियं भाषा सेवितव्या यदि च वा तद्भाषासेविनां सभ्यकोटिनिविष्टत्वं सम्पादनीयं यदि वा भाविन्या अस्मत्सन्ततेरपि अत्रस्वारस्येन प्रवृत्तिः सम्पादनीया यदि च एतेषां एतद्भाषासेविनां जीवनयात्रा नातिकठिनतया निर्वर्त्तनीया, तर्हि तत्र तादृशा उपाया अस्माभिरन्वेष्टव्याः अचिरादेव ते प्रवृत्तिपथे स्थापनीया, नहि लेखनमात्रेण मञ्चेषु वेदिकासु वा उत्थायोत्थाय पुनः पुनर्भाषणमात्रेण वा सिध्यति फलम्। सर्वैरपि अस्माभिरेकमनस्कैः उपायान्वेषणे अनुष्ठाने च अहर्निशं यत्न आस्थेयः, अमुमेव विषयमवलम्ब्य अस्माकं देशे नेपाले राजधान्यां काष्ठमण्डपनगरे संस्कृतविद्वद्भिः शर्मण्यदेशवासिभिः संस्कृतवाङ्मयसेविभिः सह संहत्य अद्यतनानां सुरभारतीसमुपासकानाम् आयतौ नियतिः समीचीना कथं संपादनीयेति विचिन्त्य "नेपाल-जर्मन विद्वद्गोष्ठी" परिचालिता तत्र संस्कृतविदुषां हितावहाः पक्षा अपि सन्ति, येषाञ्च उभयपक्षीयैः सर्वैरेवविद्वद्भिः अनुमोदनं विहितं तत्र उभय पक्षीयः सर्वकारः कीदृशं निर्णयं दित्सतीति द्रष्टव्यं वर्तते। अत्रविषये नेपालीया अपि विद्वांसो विचार विनिमये ग्रहीतव्या इति प्रतिभाति।

अद्यत्वे नेपाल एव वैधानिकं हिन्दुराष्ट्रं यस्मिन् राष्ट्रे जातिपरिवर्तनगोवंशविनाशौ प्रतिबद्धौ इति शासकीयव्यवस्थायां

(कानून) स्पष्टमुल्लिखितम्। हिन्दुरीत्यनुसारं सुरभारती-समुपासक-विद्वद्वर्गनिर्दिष्टविध्यनुसारं यत्रत्यो राजा अद्य यावद् अभिषिच्यते, वर्तमानस्य स्वतंत्रहिन्दूसिंहासनासीनस्य, नेपालदेशीयस्य, श्री ५ महाराजाधिराजस्य वीरेन्द्रवीरविक्रमशाहदेवमहोदयस्य इतः पूर्वं पञ्चमे वर्षे सम्पन्नस्य शुभराज्याभिषेककार्यस्य सुगृहीतनामधेयेन प्राञ्जलिकुलसम्भवेन श्रीपण्डितबुद्धिसागरशर्म्मणा मीमांसाचार्येण राज्याभिषेकविधानकारिका व्यरचि, तस्य नेपालराष्ट्रभाषायां आङ्ग्ल-भाषायांश्च अनुवादो व्यधायि तदनुसारं प्रयोगविधिश्च निरमायि, अयं भूपतिदशविकासं प्रजाहितपक्षञ्चादाय प्रजानां प्रतिगृहं निरन्तरं स्वयमेव परिभ्रमन् वर्तते, प्रजा अपि, स्वदेशविदेशयोश्च भ्रमणेन याथार्थ्यं ज्ञातवतो नरेशाद् देशस्यावश्यं कल्याणं भविष्यतीति गृहीताशाः सन्ति। एतस्य भूगोलस्य यत्रकुत्रापि स्थितस्य हिन्दुजनस्य कृते गौरवा-ऽऽवहोयं विषयः इति प्रसङ्गतः सूच्यते।

प्रकृतमनुसरामः इदं हि करामलकवद् अवलोक्यते, यदेतद् देववाणी समाश्रयिणां सम्यग् एवाम् अधीत्य प्राप्यापि परपारं एकस्य शास्त्रस्य, ततः समुचितां जीवनयात्राम् अपश्यताम् पश्यतांश्च तत्समकालमेव अधिगत्य भाषान्तरपरिचयं, इतोपि अल्पकालसाध्यं लौकिकव्यवहारोप-योगि-विषयसंमिश्रं न केवलं जीवनयात्रायां, अपितु सर्वेष्वपि व्यवहारेषु समुन्नतिं प्राप्नुवतः स्ववयस्कानां स्वल्पवयस्कानां, वा मनसि कियत्श्चकालादेव काचन जागृतिः समुन्मिषतीति। सेयमिदानीम् अतिमात्र विसृत्वरा अस्माकं सर्वेषां पुरस्तात् समुज्जृम्भते। साचेद् यथावत् न समाहिता तर्हि अचिरादेव विषमां समस्यामुपस्थापयिष्यति सुरभारतीसमक्षम्, न च सा समस्या धर्ममार्गोपदेशेन स्वर्गापवर्ग-

मार्गप्रदर्शनेन वा प्रशमयिष्यति। तर्हि तत्र उपायः कः ? श्रूयतां सन्ति तत्र बहवोऽप्युपायाः, बहूनि वा समाधानानि, तेषु च वयं विश्वसिमः। अध्ययनविधिसंशोधनमेव प्रथमं सोपानम् इति। यदि केचित् अत्र उपहसेयुः प्राचीनकालसिद्धम् अध्ययनविधिमेवपरिवर्तयन् सर्वमेवाधरोत्तरम् चिकीर्षतीति तान् प्रति एषः प्रश्नः, यो नाम अपौरुषेयः अपरिच्छिन्न कालिकः, अध्ययनविधिः—'स्वाध्यायोऽध्येतव्यः' इति तदनुसारिणो ये च इमे—"वेदानधीत्य वेदौ वा वेदं वापि यथा क्रमम् वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा, वेदमधीत्याऽन्यांविद्यामधीयीत" "तपोविशेषैर्विविधैर्व्रतैश्चश्रुतिचोदितैः, वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो, द्विजन्मना।"

इत्यादयो मनुयाज्ञवल्क्यादि-वचन-निचय-निर्गता अध्ययन-विधयः सन्त्येव, तेषां सर्वेषाम् आमूल-चूलं परिवर्तनं विधाय सर्वेऽपिपूर्वोक्ता-विधयः केन वा अद्यतन्या-अध्ययन-परि-पाट्यां पर्यवस्थापिताः, यस्यां हि परिपाट्यां वेदाक्षराणि लेशतोऽपि नैव स्पृष्टानि इति। यदि भगवतैव केनाप्यदृश्येन महापुरुषेण अथवा केनापि निरोद्धुम् अशक्येन निरन्तरम् अतिवेलं भ्रमता कालचक्रेण, तर्हि स एव भगवान् सर्वान्तर्यामी सर्वेषां अन्तः प्रविष्टः शास्ता, समस्त ब्रह्माण्डगोलकस्य सर्वात्मा तदेव वा कालचक्रं पुनरपि तामेव चिरन्तनीं निखिल-श्रेयोनिदान-भताम् अध्ययनाध्यापनव्यवस्थां सविशेषम् उज्जिजीविषुरिदानीं प्रेरयत्यस्मानिति कुतो न समाधीयते ? प्रायसः सर्वेषामेव संस्कृत-विदुषां संस्कृताध्यायिनां छात्राणां च मनसि समुत्पन्नोऽयं प्रश्नः किमस्माकं स्थानम् आधुनिक-लोकयात्रायामिति, तस्यैव विश्वरूपस्य प्रश्नस्य इदं सारभूतं रूपं यदस्माकं पुरत इदानीं दरीदृश्यते, तस्य-

च समाधिः अध्ययनविधौ आधुनिकतत्तद्विषयविशेष समावेशन द्वारा शिक्षाया अपि अदसीयाया लोकोपयोगितापादने नैव भवति। एतावता प्राचीनपरिपाटीविघटनमपि नअस्मदुद्देश्यकोटिविविष्टमिति मन्तव्यम्। तस्या विनैव कामपि न्यूनतां यथाशक्ति आधुनिकविषय-विशेषणां संयोजनमुखेन स्पृहणीयतमत्व-सम्पादनमस्माकं परमम् उद्देश्यम्। एवं सति आङ्ग्लभाषाध्यायिन इव इमेऽपि कञ्चन विशिष्टं विषयमुपाददानाः, तत्र परां निष्णाततां प्राप्नुवन्तः, साधारणतो लोकयात्रोपयोगि-विषयेषु प्राप्तपरिचयः स्वीयं जीवनमकृच्छ्रेणैव-निर्वहेयुः, विशिष्टा स्वीयान् अपि विषयान् परिरक्षेयुः, नवीनविषयेभ्यः स्वीयान् प्राचीनान् विषयाश्च सम्यक्तया विगतत्रासान् विदध्यु-रित्यादि बहुविचार्य अस्माकं पूर्वैरपि गुरुभिः अर्वाचीनैरपि विद्वद्भिः प्रतिभाशालिभिश्छात्रैश्च नवीनपरिपाठ्या काचनशिक्षासरणिः पर्यवस्थापिता वर्तते। तथापि संस्कृतविद्यामधीयानानाम् लोक-यात्रा अन्धे तमसि एव वर्तते। आँग्लीम् रीतिम् अनुकुर्वाणाः अस्माकं-देशे शासकाः सन्ति। ते संस्कृतविद्यां परिभूयविदुषश्च तिरस्कृत्य स्वीयां सस्मृद्धचां संस्कृतिम् अभिगण्य्य भारतीयगौरवं निस्कुलाङ्कृत्य पाश्-चात्यशिक्षोच्छिष्टेनस न्तुष्टिं भजमाना इव भासन्ते। नायं तेषां वराकाणां दोषः। किन्तु अस्माकं संस्कृतविद्याध्यायिनामेव दोषः कुत इति चेत् श्रूयताम्-परस्परं वयं सदा संघर्षे एव रताः स्म, परस्य गुणगानं नास्माभिर्ज्ञायते, दोषोद्घाटने एव दक्षाः स्म, स्ववर्गे यदि कश्चिद् अग्रे वर्धते तस्य पादौ कथं कुण्ठनीयौ इति नित्यमेव असूयां कुर्महे ! उद्योगस्य नामाऽपि विस्मर्यते, सूचिभेद्यतमः समाने आलस्यान्धेतमसि घुर्घुरा-करण-पुरस्सरं सदैव निद्राक्रान्ताः-स्म, विदुषामपि एतादृशीम्

अवस्थां वीक्ष्य खिन्नमना अस्माकं प्रियः सखा बुद्धिसागरः स्वीये चम्पूकाव्ये इत्थं लिखतिः –

स्वाध्यायाध्ययनादिभिर्बहुविधैः संस्कृत्यबुद्धिबुधा ।
नैव स्युः प्रभवः स्वयं स्वजठरस्यापूर्तयेयेऽप्यहो ।।
आलस्ये पतिता ग्रहीतु तमसः कर्मण्यलभ्यं पदं ।
दृश्यन्ते जगतीतले सुखकृते सेवां श्ववृत्तिं श्रिताः ।। इति

ऐतरेय—

सूर्यस्य पश्य श्रेयाणं यो न तन्द्रयते चरन्—इति

शुक्ल यजुर्वेदे–

वयं राष्ट्रे जागृयाम—इति

वशिष्ट-रामायणे च—

नतदास्ति जगत्कोशे शुभकर्मानुपातिना ।
यत्पौरुषेण शुद्धेन न समासाद्यते जनैः ।। इति ।।

अन्यच्च—

यथा अस्माकं मानवदेहपिण्डे सर्वेषाम् अङ्गानां समानमहत्वे-सत्यपि कानिचन अङ्गानि ध्रुवाणि कानिचन अध्रुवाणि भवन्ति। तथा प्राकृतपार्थिव-देहपिण्डेऽपि कानिचनअङ्गनानि ध्रुवाणि कानिचन अङ्गानि अध्रवाणि भवन्ति। अध्रुवाणि अंगानि छिन्यान्यपि शरीरे-किञ्चत् वैगुण्यमात्रमुत्पादयन्ति। यथा फुदितचक्षुः काण पुरुष गलित-चरणपुरुषश्च यथाकथमपि किमपि कार्यं करोत्येव। तथाविधैरङ्गैः पुरुषो नम्रियते। ध्रुवाणि अंगानि शिरोहृदयादीनि यदि कस्यचन जीवस्य शिरच्छेदो भवेत् अथवा हृदि महान् आघातो भवेद् वा स

कथमपि जीवितुं न प्रभवति इति सर्वविदितं न तत्र कापिविप्रतिपत्तिः— एवमेव पार्थिवपिण्डे नेपालदेशः शिरोभागः, देहली हृदयम्, अतः तत्र महान् आघातो भवेत् पार्थिवपिण्डस्य अथवा भूभागस्य विनष्टी स्यात्। 'पौण्ड्र वर्धन नेपाले पीठे नयनोर्युगे।

तथा च व्यष्टिपिण्डे वर्तमानासु मानवजातिषु ब्राह्मणशरीरं मूर्धन्यमिति शास्त्रानुमतम्, यदि तत्र कोप्याघातो भवेत् मानवजातिषु महान् विनाशः स्यात् इत्यत्र तत्वविदः सर्वथा निश्चयं कुर्वन्ति। अतो-हि शङ्कराचार्यः गीताभाष्यभूमिकायां ब्राह्मणस्य रक्षणं परमावश्यक-मिति दर्शयति। सत्यञ्चेतत् प्रतिभाति। यथा अद्यत्वे विज्ञान-चमत्कार-बहुले समये ब्राह्मण्यानादरपरायणै र्लोकैर्जनता गतघृणं निर्दयं पिशा-चवत् निस्पिड्यते संह्रियते नरकङ्कालेन समस्तपृथ्वी समाच्छाद्यते च। तथा च अन्वस्त्रप्रहारेण सहस्राधिकयोजनमध्यवर्तिनः स्थावर-जंगमाः सर्वे प्राणिनः क्षणेन भस्मसात्क्रियन्ते। यदि ब्राह्मणस्य ब्राह्मण-दर्शितमार्गस्य संरक्षणम् अनुसरणञ्च भवेत् आसुरवंभवमत्ता लोकाः निरीहप्राणीषु ईदृशमत्याचारं नैव कुर्युः। परन्तु खेदस्येयं वार्ता, ब्राह्मणा भ्रस्यन्ते भ्रंस्यन्तेच। यथा रक्तनीलादिवर्णबहुलेषु वस्त्रेषु बहूनां धूलीनां निपाते सत्यति तादृशी मलीनता नजायते-किन्तु सुश्वेशिते वाससि स्वल्पमपि पतितं धूलीकणं स्पष्टीभूय वस्त्रं कलङ्कयति, तथा अन्यासु जातिषु समुपलब्धमनाचरणं न तथा स्पष्टी भवति ब्राह्मण-जातीषु यथास्पष्टी भवति। इति।

अतएव भारतीयै र्नेपालीयैश्च विद्वद्भिरधिकारिभिश्च मानव-पिण्डस्य संरक्षणार्थं ब्राह्मणपिण्डं यत्नतो रक्षणीयम्। अत्र बहु वक्तव्यं वर्तते परन्तु सन्दर्भविस्तरभयात् न प्रपञ्च्यते—

तथा च अस्य भूपिण्डस्य सर्वतो ललामभूतं सर्वभूभागेभ्यः शिर सदृशं गौरीशंङ्करप्रभृतिसर्वोन्नतशिखरविराजितमिमं नेपालं विद्वांसः शिरोभागं प्रचक्षते। अत एव यथा शरीरस्य शिरोभागं सर्वतः संरक्षते तथैव भूपिण्डस्य शिरोभागो नेपालदेशः सर्वतोभावेन रक्षणीयः। शयानोऽपिपुरुषः शिरसि उपबर्हं करोति, उपबर्हाभावे काटेष्टकादिभिश्च उपबर्हणं कृत्वा शिरसः औन्नत्यं विधाय सानन्दं स्वपिति इति विज्ञानसिद्धमेव, अतः तथ्यमिदं विदित्वा ब्रह्माण्डशिरोभूतस्य नेपालस्य संरक्षणे सर्वैः संविधानता विधेयाः, केवलं प्रदेशस्य संरक्षणेन कार्यं नैव सेत्स्यति किन्तु तस्य नामरूपेतिवृत्तानामपि संरक्षणं कार्यम्।

यथा यस्य नाम पुराणप्रसिद्धं गौरीशंङ्कर इति, परन्तु आधुनिकैः तस्य नाम्निमहत् परिवर्तनं कृतं, केचन माउण्टएभरेष्ट इति कथयन्ति, केचन सगरमाथा इति कथयन्ति। इदृशेन व्यवहारेण इतिवृत्तस्यापि लो पोभविष्यति। तथाचवारं वारं पर्वताराहिणां प्रयासतः मार्गखननात् तस्य शिखरस्य भङ्गोऽपि संभाव्यते, पूर्वं नाम भङ्गं, तदनु रूपं, भङ्गं, तदनु च इतिवृत्त भङ्गः एवं भङ्गस्यैव आधोरेण्यां भूपिण्डस्यशिरोभागो यदि भंगो भवेत्, अयं भूपिण्डःकवन्धसदृशो भवेत्। निर्मस्तिकेन शरीरेण यथा मानवः किमपि कर्तुं न सक्नुयात्, तथैव भूपिण्डस्यापि अवस्था भवेत्। इति विचार्य भारतस्य सर्वकारः नेपालस्य उन्नत्यै सर्वतो भावेन प्रयत्नशीलो वर्तते। अत्र भारतीयसर्वकारः प्रशंसामर्हति-अथ च देहलीसिंहासनस्य संरक्षणाय इतिकालादारभ्य नेपालीयाः वीराः सावधानाः वर्तन्ते। दिल्लीप्रदेशस्य हृदयत्वात् हृदयसंरक्षणे कृते धमनीसिरादि-मार्गेण सर्वेषु भूभागेषु स्वस्थरुधिर-

सञ्चारणेन भूपिण्डस्य रूपिणः शरीरस्य सर्वदा उल्लाघता स्यादिति विचारवन्तो नेपालीया अपि धन्यवादं अर्हंति

अथ च—

प्रकृतमनुसराम,

संस्कृतस्यायमर्थः–यत्सम्यक्कृतम्, संस्कृतेरयमर्थः समीचीनाक्रिया, अतोऽयं विचारः प्रभवति-संस्कृतिर्विशेषणम्, संस्कृत–विशिष्टम् ।

अत एव यस्या भाषायाः संस्कारः कृतः, सा भाषा संस्कृतम्, सम्यक् सम्पादित-भोज्यपदार्थमपि संस्कृतव्यपदेश्यम् । यावत्संस्कृतस्य ज्ञानं नास्ति, तावत् संस्कृतिः संस्कारः संस्कृतं चेत्यादि पदानामर्थो न ज्ञायते तदा स्वस्य प्राचीनगौरवं नष्टं भ्रष्टं सत् नाममात्राऽवशिष्टं स्यात् ।

देशकाल-परिस्थित्यनुसारं समयेऽपि देशे विभिन्नभाषारीतिरूपा संस्कृतिराविर्भूता । स्वपूर्वपुरुषाचरण-वेशभूषादिक-कलाकौशलञ्च यत्र नास्ति समाहतं तस्य देशस्यास्तित्वं शनैः शनैः विलीयते । देशान्तरतः समाजान्तरतश्च एन आत्मन पार्थक्यं कृत्वा अद्य यावत् जातेजीवितस्य पार्थक्यं स्थापितं तस्यैव वस्तुन उपेक्षा यदा कृता क्रमशस्तस्य लोपश्च कृतं चेत् तादृशे समाजे स्वीया राष्ट्रीयता अवश्यं समूलमुन्मूलितं भविष्यति । जात्यन्तरस्य विस्तीर्णानां समुपेयुषिः कलाःकौशल-रीति-स्थिति-खान-पान-वेश-भूषादिदम्बके प्रविश्य स्वदेशीय-वेशभूषारीतिः-स्थिति-खान-पान-कलाकौशलस्य उपेक्षामात्रं नहि समूलमुन्मूलनं कृतवन्तः अथच जडा भवतो वयं अद्यत्वेऽवश्यं देशस्य महान्तोरिपवः । अतोऽपि एतादृशे विपरीते पथि चलितुमुद्यतां तां जातिं समाजं च वयं यदि आत्मन आत्मीयतापरिचयं नैव बोधयिष्यामः तदास्माकं जातेः

कुलपरम्परागतस्य धर्म कर्मणश्च मूलोच्छेदनं कृत्वा मानवा नहि दानवा भविष्यामः।

वयं उच्चहिमालयस्य प्राकारपरिधेरन्तरस्थिताः। अस्माकम् अस्मिन् समये इदं कर्तव्यम्-यत् स्वसंस्कृति-परिरक्षणम्। स्वकीयगेहस्य कुञ्चिकां अन्यस्मै दत्वा स्वयंदासवत् स्थिता स्वमपिवस्तु परदत्तवत् चादाय उपभोगं कुर्वाणा अस्माकं भ्रातरः तदेव समीचीनं मन्यमानाः सन्ति। इत्थं कृत्वा कृत्वा किं जातं किंभविष्यति इदं नैव चिन्तयते।

'हिमालयो नाम नगाधिराजः, 'स्थितपृथिव्या इव मानदण्डः, एतादृशो गिरिराजचक्र चूडामणिः अस्माकं संस्कृतेः संस्कृतस्य सृष्टितोऽद्ययावत् रक्षां कुर्वन् पुरतस्तिष्ठति-पृथिव्या मानदण्डसदृशः सोऽयं पर्वतराजो यावत् अस्माकं पुरतस्तिष्ठति तावत् अयं हिमालयः वैदिक-सनातन-धर्मावलम्बिनां सम्पूर्णविश्वस्य राष्ट्रस्य च गुरुः।

भवतुनाम राज्ञो राज्यस्य समये समये परिवर्तनम्। यथा हि नेपालस्य पूर्वेतिहासतो विज्ञायते कस्मिन्समये भागीरथ्योत्तरवर्तिद्वारवङ्ग कश्मीर-गढवाल-काँगडा-कूर्माचल-सिक्किम दार्जलिङ्ग-भूटान-प्रभृतयो देशा नेपाले संमिलिता आसन् 'अद्यत्वे ते देशा पृथक् सन्ति, परन्तुसोऽयं हिमालयः पृथिव्याः मेरुदन्डःसन् भूमण्डलस्योपस्टम्भसमानः। शक्तिमाश्रित्य प्रबलो देशो दुर्बलदेशंस्यापि संस्कृतिर्नाशयितुं नार्हति। इयं हिन्दुसनातन संस्कृतिरतिप्राचीना, इयं सजीवा जागरुका प्रबलशक्तियुक्ता। अनेन अनकाजातयः आत्मसात्कृता। परन्तु इमामाक्रष्टुं कस्यापि शक्तिर्नास्ति, अत्रेदं विशिष्टम्। भारतवर्षे अनेका प्राचीन-संस्कृतयः समुपलभ्यन्ते, यथा इन्द्रध्वजोत्थापनम्, गन्धर्वयात्रा इत्यादयः। हिन्दुमात्रस्य उपास्यदेवता नेपाले भेदभावरहितं सबौद्धाहिन्दुसमान-

भावेन सेवते। अन्य देशे बौद्धाःशैवधर्मविरोधिनः परन्तु नेपाले बौद्धा अपि श्रीपशुपतिनाथं बुद्धभावेन पश्यन्ति आदृयन्ते च। वैदिका अपि मञ्जुश्रियं बौद्धदेवीं सरस्वतीमूर्त्या पश्यन्ति आदृयन्ते च। बुद्धेन वर्करासिहश्च साकमेव सहैव जलं पायित एतस्यायमेव दृष्टान्तः। नेपाले बुद्धेन लुम्बिन्यां जन्म गृहीतं, तस्य राजधानी कपिलवस्तुरपि नेपाले वर्तते। नेपालदेशात् अरनिको नामा कलाकोविदश्चीनं गत्वा स्वकीयसजीवशैल्याः प्रचारेण तत्रविश्वकर्मा सञ्जातः। भृकुटी च नेपालादेव तिब्बतदेशे गत्वा धर्मप्रचारं कृत्वा हरिततारा नाम्ना प्रसिद्धिमुपगता। अस्मादेव देशात् सीतया भारते पातिव्रत्यं प्रवर्तितम्। नेपालस्य-सुवर्ण-ताम्र कौशिक्योस्तटे तपः कुर्वता याज्ञवल्केन मनुस्मृतिसंशोधनरूपा याज्ञवल्क्यस्मृतिः प्रवर्तिता। पाणिनिनापि नेपाले कृष्णागण्डकीतटे तपः कृत्वा भूतभावन-शङ्कर-वरप्रसादतः "अइउण्" इत्यादि चतुर्दशसूत्राणि वरत्वेन लब्धानि।

यन्नामा अयमजनाभवर्ष, भारतवर्ष, नाम्ना प्रसिद्धिमुपगतः। ऋषभदेवपुत्रभरतस्य राजर्षेः अस्मिन्नेव देशे राजधानी आसीत्। महाज्ञानीनं जडभरतं किरातजात्या राज्ञा नरबलिं दातुं नेपालदेशीया। इक्षुमत्यास्तटे भद्रकालीमन्दिरस्य सन्निधौ समानीतम्। सिन्धुसौवीरदेशो वर्त्तमाने सिन्धुपालचोकेति प्रसिद्ध तस्य देशस्य राजा रहुगणोऽपि ज्ञानलाभार्थं पुलहाश्रमं (रिडीम्) इक्षुमत्यास्तटमार्गेण गच्छन् माग महाज्ञानिनं भरतं सम्प्राप्तवान्। अयमाश्रमोऽपि नेपालस्य पश्चिमपर्वतप्रदेशे चक्रनदी (शालग्रामी नदी) वर्तते। अन्यच्च—

ऐणिमिति ऐणजन्मग्रहणत्वात् भरतमेव बोधयति, तादृशी ऐणीजाति नेपालराजधान्या पश्चिमदाङ्गप्रदेशे अधुनापि यत्रतत्रैव निव-

सन्ति। अनया युक्त्या भरतमहाराज नेपालदेशीय तस्य राजधानी दाङ्ग एवेति निश्चितम्। हिमालयतः समुद्रपर्यन्तं महाराजो भरतेन शासित मिति प्राचीनं गुरुतर प्रमाणमपि स्थले स्थले लभ्यन्ते, एतावतैव भारतनाम्ना निर्दिष्टं भारतं राजनैतिक दृष्टयैव भिन्नःस्यात् नतु धार्मिक-ऐतिहासिक दृष्टचा। –यथा नदीनां श्रोतः हिमालयतो नेपालमार्गेण प्रवहति तथैव जातेः संस्कृतेर्धर्मस्य च प्रवाह। अस्मादेव नेपालात् अन्यत्र गत, इति प्रतीयते। राज्ञः सत्यव्रताय भगवता प्रलयकालीन-मन्तिमदर्शनं दत्वा कथितम्-विश्वं प्रलयोन्मुखं वर्तते अहं तव कृते नाव-मेकां, प्रेषयिष्यामि त्वं तत्र सर्वौषधस्य वीजं रक्षित्वा तिष्ठ यदाहं मत्स्यरूपीभूत्वा शृङ्गमेकं प्रदर्शयन् आगमिष्यामि, तत्र तस्या नावो रज्जुं बधान तदा च मत्स्यरूपिणं मम दर्शनं लप्स्यसे। तस्य भगवतो मत्स्यस्य पुच्छं पर्वतरूपेण हिमालये अद्यापि दृश्यते। यस्य शृङ्गस्य मत्स्य पुच्छं (माछापुछ्रे) इति अद्यापि प्रसिद्धिरस्ति। यस्य दर्शनाय बहवः पाश्चात्या पोखरानगरे आगच्छन्ति, नेपाले एव कौशिक्यास्तटे तपः कृत्वा विश्वामित्रेण गायत्र्या दर्शनं लब्धं ब्राह्मणत्वञ्च प्राप्तम्।

नेपालान्तर्गत-जनकपुरीमध्ये याज्ञवल्केन शुक्लयजुर्वेदः प्रस्तुतः। अत्रैव जनकेन औपनिषदो ज्ञानयज्ञः प्रवर्तितः। एतादृशप्राचीन-संस्कृतेः संस्कारद्वारा सुरक्षकरण-शक्तिरमरभाषायां वेदोपनिषदेति-हासपुराणादयोग्रन्था अस्माकं पुरतो नाभविष्यन् वयं कोऽयं देशः ? किमिदं स्थानम् ? केयं नदी केयंदेवता ? इत्यादिनैव ज्ञातुं प्राभविष्याम तदेव रम्यं रुचिरं नवं नवं एतावत् पुराणं सत्यपि नित्यं रमणीयं सुन्दरं सर्वदा आयातयामं संस्कृतमिदमेव। इमां संस्कृतभाषां विहाय नान्यत् किमपि ईदृशमस्तीति अस्माभिरिदं अवश्यं विचार्यम्।

(१)

संस्कृतं तावदेव पुरातनम् यावत् विश्वमिदम्, यदपि कार्यमारभ्येत तस्यादौ तस्य कार्यस्य सृष्टिस्थितिसंहारस्य विधानमपि निर्मीयते। विश्वमिदं यावत् कार्यरूपे नासीत् केवलं कल्पनारूपमासीत् तदास्माकं संस्कृतवाङ्मयशास्त्रं परब्रह्मरूपिणा सच्चिदानन्दरूपिणा श्रीसर्वेश्वरेण नारायणेन मनसि निर्मितम्। स्वयंभुवे ब्रह्मणे उपदिष्टम्। संस्कृतमिदं समुद्रादपि गभीरम्, आकाशादपि अपरिमितम्। तस्याद्ययावत् केनाप्यन्तसीमा न निर्धारिता। एतावती गभीरा, सर्वज्ञा, स्वयं स्मृतिपथमुपगता अपौरुषेया च एषा संस्कृतभाषा। अत्र किं नास्ति? धमार्थकाममोक्षाः चत्वारः पुरुषार्था अत्रैव प्रतिपादिताः। देवनागरीलीपी, देवभाषा इति नामैवास्य संस्कृतस्य प्राचीनत्वे सिद्धम्। भाषान्तरे प्रान्तीय-वर्गीय-जातीय-वर्गच्छेदेवर्तते। संस्कृतमिदं परिच्छेदातीतम् विश्वजनिनम् एन आसेतुहिमाचलं संस्कृतेरैक्यं दृढमद्यापि स्थापितम्। सम्पूर्णविश्वस्य यदि काचिद्भाषा समानदृष्टियुताविश्वप्रेमवती च अस्तिचेत् तर्हि संस्कृतभाषैव तादृशी भवेत्। यावत्सामान्यरूपेण संस्कृतस्य एकस्वरेण राष्ट्रभाषा नोद्घोष्येत, तावत् भाषाविवादो नैव समाप्यते। संस्कृतस्य न कोऽपि देशाःस्वीयाः सर्वे एव स्वकीया। संस्कृतमात्मसात्कर्तुं नकामायमानो नकश्चिद्देशोऽस्ति। एतावती मधुरा प्रिया च विश्वभाषा संस्कृतवाणी प्राचीनयुगस्य शिलालेखतः अद्ययावत् प्रचलितपत्रेषु-ॐ स्वस्ति श्री इति, आरम्भः, शुभं समाप्तिश्चात्र व इयं प्रणाली वैदिकसिद्धान्तस्य चिह्नम्। वर्तमाने निरपेक्षेऽपि समये कदा कस्य चनवस्तुनो नामकरणं कर्तव्यं तदा संस्कृतस्य स्वीकरणं विना न कस्यापि सन्तोषः। यथा— मन्त्री, शचिवः, आदेशः, निर्वाचनं प्रजातन्त्रः, पञ्चायत्तं, परिवहनं, परि

चलम् इत्यादि इदृशभावपूर्णसंस्कृतभाषाया सुरक्षाकरणाय सर्वेषु प्रान्तेषु राष्ट्रेषु अञ्चल-अंचल प्रति संस्कृतमहाविद्यालयस्य नितान्तमावश्यकता अनिवार्यता। निःशुल्काध्ययनाध्यापनप्रणाली संस्कृत परीक्षोत्तीर्णानां सर्वकारस्य सर्वतः मान्यतामावश्यकम्।

अस्माकं देवनागरी कदा कथं उत्पन्ना ? अत्र—धाता यथापूर्वमकल्पयत्, अथवा—"इदमक्षरं छन्दोवर्णशः समनु क्रामन्तं ब्रह्मा बृहस्पतये बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाजः ऋषिभ्यः ब्राह्मणेभ्यः तं खल्विदमक्षरं समाम्नायमित्वा चक्षते न भूत्वाभक्तं ब्रूयात् ब्रह्मराशि।" अनेन ऋक्सूत्रेण सर्वं व्यक्तीकृतम्—

सेयं संस्कृतिर्यादृशी लभ्यायमानादृश्यते विश्वस्मिन् नान्यत् तादृशीति वयं साभिमानंकथयितुं शक्नुम। 'यस्मिन् देशे, य आचारो व्यवहारः कुलस्थिति; तथैव परिपाल्योऽसौ यदा वशमुपागतः।" इति सञ्चिन्तयन्, 'येनास्यपितरोयाता येन याता पिता महा; येन यायात् सतां मार्गस्तेन गच्छन् नरिष्यति। इति च कथनं प्रतिपालनीयम्।

ग्रीक लेटिन हिन्दी चीनी प्रभृति भाषाष्वपि लिङ्गभेदोस्ति-यथा संस्कृते इत्थंमैक्समूलरोऽपि वदति-आदौ एकैव सस्कृतभाषा आसीत् अन्या सर्वा भाषासंस्कृतस्यैव विकृतयः। तेनेदमपि स्वीकृतमानवाः पूर्वं भारतीया हिमालये आसन् ततएव विश्वस्मिन् प्रसृता। येन शास्त्रेण-वेद पुराण तीर्थव्रतगोविप्र-देवधर्मकर्मपूजापर्वन्याय-मातापितृ-गुरूसेवा देशभक्ति राजभक्ति प्रभृतयः सभ्यताःशिक्षिता, अनाचार स्याङ्कुर स्यापिहृदयेऽङ्कुरितंस्थानं नदत्तं, तादृशशास्त्रस्यमुखमात्रमपि नविलोकितं यत् समाजस्य अन्धाः (सर्वस्यलोचनंशास्त्रं) विशिष्ठ

विशिष्ठपदे समारूढा-तदा तेभ्योविश्वासघातादीनि क[illegible] कथं न स्युः अतोऽहमद्य विद्वत्समक्षं कथयामि संस्कृतस्य शास्त्रदृष्टितः सर्वेषां चक्षूंस्यून्मील्य शास्त्रीयमर्यादां शिक्षयित्वा देशतो दुराचारस्य दुष्कर्मण अपादरणं विधेयम्। नोचेत् केवलं विलासपूर्णायां अनार्यभाषायां विमुग्धाःसन्तः सुरासुन्दरीसुवर्णानां चाकचक्येन प्रलोभिता सन्तः अन्धे तमसि निमज्जेयुः राष्ट्रस्य सञ्चालनाय सारल्यस्याऽत्यन्तमावश्यकता। साधारणं खाद्यं साधारणोवेशस्य आवश्यक ! तत्रोपेक्षां कृत्वा अहर्निशं महति आडम्बरपूर्वक खानपानादिके आशक्तिःस्यात् तदा राष्ट्रःकेवलं विलासपरायणं स्यात् यावतः योजना स्युः तथापि नपर्याप्तम् स्यात्। राष्ट्रान्तरतः ऋणमादाय तस्य भारेण राष्ट्रे पीडिते सति किंभविष्यति। अचिरेणैव परतन्त्रतामुपैष्यति, अतो निगूढं विलोक्यमाने संस्कृतज्ञेषु यावती सरलता दृश्यते न तावता इतरेषु।—अथ च गवां सर्वशरीरे मर्तमानापि पयः यथा स्तनप्रदेशान्निर्गच्छति तथैव विश्वज्ञानं सदपि दिव्यपवित्रदेशे विशेषं स्यात्।—अहं अनया भावनया सर्वकाराय स्मारयामि अस्माकं संस्कृतस्य मूलं वेदस्यमाता गायत्री गायत्रीतो वेदाः पुराणानि स्मृतयश्चाविर्भवन्ति। अतः समस्तहिन्दुजाते सम्पूर्णवेदस्यास्य जननी गायत्री; सा गायत्री विश्वामित्रेण नेपालान्तर्गत कौशिक्यास्तटे प्रकटीकृता। देशे यदा महामारी दुर्भिक्ष्यराष्ट्रविप्लव अतिवृष्टि अनावृष्टि परचक्र भयञ्चा स्यात् तत् प्रतिकाराय गायत्रीमहायज्ञविधिपूर्वकमवश्यं कर्तव्यम्। यस्य फलं प्रत्यक्षं भवति परञ्च तत्र कर्मकर्तृकरणमन्त्रवाक्य-आहार-आचार-विचारशुद्धिरवश्यं संपादनीया, यावत् पर्यन्तं राष्ट्रे संस्कृतविद्या संस्कृतज्ञा स्यात् तत्र सर्वापि हिन्दु परिपाटी स्यात्। अतः संस्कृत-पठन-पाठन-मननसम्मेलनस्य स्थाने स्थाने समये समये प्रतिपादनस्य प्रचारस्य च परमावश्यकताऽस्ति, अस्तु।

महेन्द्र संस्कृत विश्वविद्यालय

वाल्मीकि विद्यापीठ

पुस्तकालय

श्री सोमनाथ उपाध्याय घिमिरे 'व्या

टंगाल काष्ठमण्डप, नेपाल द्वारा रचितपुस्तक

१— मयूरध्वज धार्मिक नाटक

२—शङ्कर विजय नाटक

३—व्यसनमीमांसा

३—शालग्राम मीमांसा

५—हिन्दू राष्ट्र

६—विष्णु पूजापद्धति

७—पञ्चायत्त शास्त्र

८—पश्चात्ताप

९—घिमिरे वंशावली

१०—भारत और नेपाल

११—विशिष्टाद्वैत दर्शन (रामानुज जीवनी)

१२—भोज तथा कालिदास (अ. प्र.)

१३—नयाँ उपन्यास (अ. प्र.)

१४—सरल संस्कृत शिक्षा भाग १,२,३ (अ. प्र.)

१५—गुरुनानक सिद्धान्त

१६—आशौच विज्ञान

१७—संस्कृतमय नेपाल देश